श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री अय्या देवनाथ तातदेशिकन् विरचितम्

# ॥ श्रीजम्बूपुरनिवास श्रीनिवासस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीजम्बूपुरनिवास श्रीनिवासस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनिवासाय महते पुरुषाय नमो नमः।
यतः सर्वमिदं जातं स्थितमन्ते प्रलीयते॥ १ ॥

सरसि सरसिजार्थं न्यस्तपादे गजेन्द्रे
ग्रसति महति नक्रे घुष्यमाणे निदाने।
सपदि गरुडवेगात् यस्तमेत्याभ्यरक्षत्
स हरिरवितुमस्मान् जम्बुधाम्न्यविरासीत्॥ २ ॥

स हरिरुरसि लक्ष्मीं हस्तयोः शङ्खचक्रे
करमधिकटि वामं दक्षिणे दानमुद्राम्।
तदधिकमनोज्ञः त्रातुमद्यापि तिष्ठन्
भव शरणमिहेति प्रार्थनां प्रेक्षते नः॥ ३ ॥

तदुषसि निजतल्पादुत्थितैराशु सर्वैः
सरसि विहितसान्ध्यैरालयं तस्य गत्वा।
परिगतिनतिपूर्वं प्रार्थ्यतां तत्तदिष्टम्
तदनु स वितरेद्वः सर्वमिष्टं वदान्यः॥ ४ ॥

सकृदुदितमेतत् हृद्यपद्यत्रयं यः
पठति स शमिताद्यः त्यक्तरागस्त्रिवर्गे।
स्वकृतसुकृतभूम्ना साभिलाषोऽपवर्गे
परमपुरुषभक्त्या प्राप्नुयात् ब्रह्मलोकम्॥ ५ ॥

इति महदुपसत्त्या जातया तत्त्वमत्या
परमहितमवोचत् सङ्ग्रहं देवनाथः।

स्वमहिमकथनेनानेन सर्वान्तरात्मा
विमलगुणपयोधिः प्रीयतां श्रीनिवासः॥ ६ ॥

॥ इति श्रीजम्बूपुरनिवास श्रीनिवासस्तोत्रं संपूर्णम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥